॥ श्रीरामो जयति ॥

॥ अथ कुमारसंहितोक्तः ॥

॥ श्रीरामायण नवाहपारायणविधिः ॥

माण्डूकर्णिरुवाच—

कुम्भसम्भव धर्मज्ञ विष्णुभक्त नमोऽस्तु ते ।
रामायणस्य यत्प्रोक्तं नवाहपठनं त्वया ॥ १ ॥
विस्तराच्छ्रोतुमिच्छामि तदद्य मुनिपुङ्गव ।
पूजां पारायणं दानं जपहोमार्चनादिकम् ॥ २ ॥
कथं कार्यं कदा वाऽपि कुत्र वा वद विस्तरात् ।

अगस्त्य उवाच—

मुने वक्ष्यामि ते पृष्टं श्रूयतामवधानतः ॥ ३ ॥
तुष्टोऽस्म्यनेन प्रश्नेन राघवं स्मारितोऽस्म्यहम् ।
धर्मकामनयावाऽपि अर्थकामनयाऽपि वा ॥ ४ ॥
मोक्षकामोऽथ वा रामप्रीतिमात्राभिलाषुकः ।
अपस्मारादिरोगैश्च दुश्चिकित्सैः प्रपीडितः ॥ ५ ॥
नवग्रहाणां दौस्थ्येन पीडितो वाऽपि चैकद ।
विश्लिष्टबन्धुसंयोगकामुको वा सुतार्थिकः ॥ ६ ॥
श्रीमद्रामायणाख्यस्य इतिहासोत्तमस्य च ।
नवाहपठनं कृत्वा सर्वं सौख्यमवाप्नुयात् ॥ ७ ॥
गृहे देवालये वाऽपि महाभोगाङ्कणान्विते ।

श्यां मृतानां कर्णदेशे भगवता भवेन भवपाशनिवृत्तये उपदिश्यमानतारकनाम्नः, वालिमारीचमाल्यवन्मथादिभिर्महापातकिभिरपि स्तूयमानधर्मपरत्वमाहिममहितस्य सकृदपि नमतां आदेहान्तं समस्तानपि भोगान् अतःपरं बन्धमोक्षं चार्पयितुं वामाङ्कस्थितया सीतया दक्षिणकरकमलोद्भासिन्या चिन्मुद्रयाच विलसितस्य भगवतः श्रीरघुनन्दनस्य चरित्रप्रतिपादनेन महनीयतमस्य, श्रीरामायणाख्यमहेतिहासस्य, कुमारसंहितोक्तप्रकारेण अगस्त्येन माण्डूकर्णये महर्षये उपदिष्टां रीतिमनुसृत्य मम (आवयोः) सीतारामप्रसादेन सकलविधारिष्टनिवृत्तिद्वारा सर्वाभीष्टसिध्यर्थं —— सिध्यर्थं नवाहश्रवणपठनाख्यं कर्म करिष्ये ॥ इति सङ्कल्प्य ॥

पठितारौ कुशलवस्वरूपौ वृणुयात्ततः ।
वक्तारमपि वाल्मीकिरूपमेकं वृणीत च ॥ २१ ॥
श्रोतारमेकं हनुमत्स्वरूपं वृणुयात्ततः ।
उपश्रोतॄन् ततस्त्रींश्च वृणुयाद्राघवप्रियान् ॥ २२ ॥
पठने वा प्रवचने श्रवणे वा यदा स्वयम् ।
पटुर्भवेत्तदा कुर्यात्तथा सङ्कल्पमेव च ॥ २३ ॥
ततः पठेन्नारदोपादिष्टमारभ्यसर्गकम् ।
आबालकाण्डसंपूर्तेः पठेत्तु प्रथमे दिने ॥ २४ ॥
द्वितीये वै दशरथप्राणयात्रान्तमेव च ।
तृतीये तु दिने पाठ्यं अयोध्याकाण्डशेषकम् ॥ २५ ॥

चतुर्थे तु पठेत् गृध्रराजमोक्षावधि क्रमात् ।
बिलप्रवेशात् पूर्वन्तु पञ्चमे विरमेत् पुनः ॥ २६ ॥
हनूमतो निवृत्त्यन्तं षष्ठे लङ्कापुरात् पठेत् ।
नागपाशनिवृत्त्यन्तं सप्तमे दिवसे पठेत् ॥ २७ ॥
रावणस्य वधान्तं च दिवसे चाष्टमे पठेत् ।
नवमे दिवसे पाठ्यं यावद्रामाभिषेचनम् ॥ २८ ॥
पठनान्ते राघवस्य विष्णोर्नामसहस्रतः ।
मल्लिकाचंपकैरर्चां पद्मैर्वा तुळसीदळैः ॥ २९ ॥
कृत्वाऽथ पायसापूपभक्ष्यभोज्यादिसंयुतम् ।
शाल्यन्नं विनिवेद्याथ ब्राह्मणान् भोजयेत्ततः ॥ ३० ॥
प्रथमे दिवसे विप्राः भोज्या द्वादशसंख्यकाः ।
द्वितीमेऽष्टौ तृतीये तु विंशतिश्च चतुर्थके ॥ ३१ ॥
दश विप्राः पञ्चमे तु भोज्याः पञ्चदश द्विजाः ।
षष्ठे च द्वादशैव स्युः सप्तमे तूनविंशतिः ॥ ३२ ॥
अष्टमे दश विप्राश्च न संख्या नवमे स्मृता ।
मध्वाज्यफलसंमिश्रं भोजनं सर्वदा दिशेत् ॥ ३३ ॥
दक्षिणामपि विप्राणां दद्याद् भुक्तवतां व्रती ।
सायं च यामे पूर्वे च रात्रेः प्रतिदिनं ततः ॥ ३४ ॥
वक्तुर्मुखाच्च शृणुयात् पूर्वाह्णपठितस्य च ।
भक्त्याऽर्थान् पूजयेत्तं चाप्यभीष्टैः प्रतिवासरम् ॥ ३५ ॥
वक्ता श्रोता च पठिता यजमानस्तथैव च ।

ब्रह्मचर्यव्रतपरा भवेयु र्नव वासरान् ॥ ३६ ॥
एवं कृत्वा प्रतिदिनं प्राप्ते तु नवमे दिने ।
पठनान्ते तु सङ्कल्पं कृत्वा कल्पोक्तमार्गतः ॥ ३७ ॥
कृत्वा पूजां यथाशक्ति पुष्पादिद्रव्यसंयुताम् ।
कुर्यात् पट्टाभिषेकाख्यमहोत्सवमथादरात् ॥ ३८ ॥
स्वगृह्योक्तेन विधिना प्रतिष्ठाप्य हुताशनम् ।
क्षीरान्नेन च पालाशसमिद्भिश्च घृतेन च ॥ ३९ ॥
त्रिशतं रामगायत्र्या जुहुयाद्राघवं स्मरन् ।
गुडान्नेन च दूर्वाभिर्घृतेन च चतुश्शतम् ॥ ४० ॥
मूलमन्त्रेण जुहुयात् स्वयं वाऽऽचार्यमूलतः ।
धर्मात्मेति च मन्त्रेण घृताक्तान्नेन सर्पिषा ॥ ४१ ॥
अश्वत्थसमिधा चाऽपि जुहुयास्त्रिशतं व्रती ।
तद्विष्णोरिति मन्त्रेण हुनेदष्टोत्तरं शतम् ॥ ४२ ॥
तत्र हव्यं तु शुद्धान्नं समिधस्तु कुशाः स्मृताः ।
होमाशक्तौ होममन्त्रान् होमत्रिगुणसंख्यया ॥ ४३ ॥
आवर्तयेद्रघुपतिं कूर्चेष्वावाह्य चोच्चकैः ।
प्रतिमामप्यथोद्वास्य दद्याद्विप्राय योगिने ॥ ४४ ॥
स्नपयेद्यजमानं चाचार्यः कुम्भजलेन च ।
वक्त्रे पठिते श्रोत्रेच वस्त्रालङ्करणादिभिः ॥ ४५ ॥
दीनारैरपि संमानं ततः कुर्याद्यथोचितम् ।
इदं व्रतं शुक्लपक्षे चैत्रेवाऽऽश्वयुजेऽपि वा ॥ ४६ ॥

प्रथमायां समारभ्य नवम्यां च समापयेत् ।
तिथिवृध्यातु नवमी यदि स्याद्दशमे दिने ॥ ४७ ॥
तदाऽऽरभेद्द्वितीयायां नवाहं स्यान्महोत्सवः ।
तिथिक्षयेण सा चेत् स्यादष्टमे दिवसे भवेत् ॥ ४८ ॥
अमायांतु व्रतमिदं प्रारभ्य नव वासरान् ।
मध्याह्नव्यापिनी ग्राह्या नवमी रामपूजने ॥ ४९ ॥
कुर्याद्भक्त्या च तुष्ट्या च श्रद्धया च समन्वितः ।
मासद्वयन्तु पूर्वोक्तं मुख्यपक्षसमाश्रयात् ॥ ५० ॥
अन्येष्वपि च मासेषु शुक्लपक्षे यथारुचि ।
कुर्यात् व्रतमिदं यत्तः सर्वसंपत्समृद्धये ॥ ५१ ॥
एवं कृते जगत्स्वामी रामभद्रः श्रियःपतिः ।
तुष्टो भवति मोक्षान्तान् सर्वान्कामान् ददाति च ॥
अपुत्रो लभते पुत्रं अपमृत्युं तरेत च ।
भुञ्जीत सर्वान् भोगांश्च कुबेरेण समो भुवि ॥ ५३ ॥
आचन्द्रार्कं वंशवृद्धिः यजमानस्य वै भवेत् ।
प्रीयन्ते पितरस्तस्य आविंशतिकुलं ततः ॥ ५४ ॥
नरकादुत्तरन्त्येते राममाहात्म्यतोऽखिलाः ।
आयुः कीर्तिश्च वर्धेत सर्वं दुःखं प्रणश्यति ॥ ५५ ॥
इदमुक्तं महाभाग माण्डूकर्णे महामुने ।
रामातिक्रमदोषाच्च क्षत्रियभ्रूणनाशनात् ॥ ५६ ॥
इदं यथोदितं चक्रे जामदग्न्यः पुरा व्रतम् ।

प्रत्यक्षीभूय रामश्चाप्यनुजग्राह तं ततः ॥ ५७ ॥
बहुभिश्च ततो भूपैः मुनिभिश्च द्विजोत्तमैः ।
अनुष्ठितं व्रतमिदं तत्तत्कामनयाऽन्वितैः ॥ ५८ ॥
अनायासेन ते प्राप्ता अभीष्टं रघुसत्तमात् ।
एवं कर्तुमशक्तश्चेत् वित्तलोभं विना द्विजः ॥ ५९ ॥
यावच्छक्ति व्रतमिदं कुर्याद्भक्तिसमन्वितः ।
सर्वाशक्तौ नवदिनं यथोक्तक्रमतः पठेत् ॥ ६० ॥
पूजयेच्च रघूत्तंसं तेन रामः प्रसीदति ॥ ६०½ ॥

इति श्रीकुमारसंहितायां अगस्त्यमाण्डूकर्णिसंवादे
॥ श्रीरामायणनवाहपारायणविधिकथनम् ॥
॥ समाप्तम् ॥

॥ श्रीरामो जयति ॥

॥ अथ श्रीरामदशावरणपूजा ॥

॥ प्रारभ्यते ॥

आदौ सङ्कल्प्य । कलशपूजां शङ्खपूजां च कृत्वा । आदौ लिखेद्यन्त्रराजं रघुनन्दनविग्रहम् । सौवर्णे राजते ताम्रे पीठे भूर्जेऽथवा भुवि ॥ विना यन्त्रेणचेत् पूजा देवता न प्रसीदति । श्रीरामः पूजितो यन्त्रे सीतया सह यन्त्रितः ॥ यदिष्टं तत्करोत्येव नात्रकार्या विचारणा । तदित्थम्— मध्ये षट्कोणम् ।